


WWJMRD 2020; 6(08): 66-69
www.wwjmrd.com
*International Journal Peer Reviewed Journal Refereed Journal Indexed Journal Impact Factor MJIF: 4.25 E-ISSN: 2454-6615*

**कुलदीपसिहः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विद्यापीठम्

**Correspondence:**
**कुलदीपसिहः**
शोधच्छात्रः, धर्मशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विद्यापीठम्

# धारणाद्धर्ममित्याहुः

## कुलदीपसिहः

भारतवर्षस्य पुण्यभुवि बहुप्राचीनकालाद् आरभ्य सनातनो वैदिकधर्मः सम्यक् पालितः परिपोषितश्च वर्तते। वैदिकधर्मोऽयं निखिलविश्वस्य आदिमधर्म उच्येत चेन्न कश्चन सन्देहलेशावकाशः। वेदस्य सन्देशः सर्वैरपि शास्त्रैः सुष्ठु उपबृंहितो वर्तते। नैकेषां ग्रन्थानां प्रणयनम् एतस्य प्रमाणभूतम्। सर्वेषामपि आचार्याणां, महर्षीणां, मनीषिणां च अयमेव उपदेशो यत् मानवजीवनस्य परमं लक्ष्यं नाम धर्मार्थकाममोक्षाणां चतुण्र्णां वर्गाणां फलप्राप्तिः। एतेषु चतुर्षु पुरुषार्थेषु धर्माख्यो हि प्रथमः पुरुषार्थः। स एवान्येषां त्रयाणाम् अर्थ-काम-मोक्षाणां परमं साधनं भवति। अन्तिमः पुरुषार्थः मोक्षस्तु तत्पूर्ववर्तिनां धर्मार्थकामानां चरमं लक्ष्यं भवति। परन्तु इदमवधेयं यद् धर्माद् ऋते अन्येषां पुरुषार्थानां प्राप्तिः नैव सम्भवति। अतः धर्म एव जगतो धारको भवति। धारकाद् ऋते धार्यस्य स्थितिः न कदापि सुदृढायते। उच्यते -

**‘‘धर्मो विश्वस्य जगतः प्रतिष्ठा’’**
**लोके धर्मिष्ठं प्रजा उपजीवन्ति धर्मेण पापमपनुदति।**
**धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति।**

अर्थात् विना धर्मं जगत् क्षणमपि स्थातुं न शक्नुयात्। अतः अस्माभिः धर्मस्य विचारः तस्य धारकत्वविशेषम् अवधाय विधेयः।
धर्मो हि निखिलस्य जगतः प्रतिष्ठा वर्तते। धर्मे एव विश्वं जगत् समाश्रितम्। धर्मात्मा समेषां समाश्रयः। धर्माचरणेन पापानि नश्यन्ति। अत एव धर्मज्ञा मनीषिणो धर्मं सर्वोत्कृष्टं मन्यन्ते।
धर्मपालकस्य रक्षकः स्वयं धर्म एव खलु। यो धर्मं तिरस्करोति सोऽधोगतिं विन्दते। उक्तं मनुना -

**‘‘धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**
**तस्माद्धर्मो न हन्तव्यो मानो धर्मो हतो वधीत्॥’’**

वैदिकवाङ्मये जगतः कारणतत्त्वं नाम धर्म इत्यभिधीयते –

**‘‘धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ।’’**

**धर्मस्य व्युत्पत्तिः -**
‘धृञ् धारण-पोषणयोः' इत्यस्माद् धातोः 'मन्' प्रत्यये कृते धर्मशब्दो निष्पद्यते। अस्यार्थो धारणम्, पालनम्, आश्रयणादिकं च वर्तते- “धरति लोकोऽस्मिन्" 'धरति लोकं वा', 'धरति विश्वम्' इति, 'धरति लोकान्' ध्रियते वा जनैरिति'।
तत्र “धारणाद् धर्मः" इति पुराणेषु व्युत्पत्तिः। "यं लोको धारयति स धर्मः", उतवा “यो लोकं धारयति स धर्मः" इति चिकित्सायां “धर्मो धारयति प्रजाः” इति पुराणेषु संशयापसारि वाक्यं समुपलभ्यते । एतेन धर्म एव लोकस्य धारक इति निश्चीयते । अथ कोऽयं धर्मो यो लोकं धारयतीति प्रश्ने -

**"यमार्याः क्रियमाणं हि संशयात्मवेदिनः।**
**स धर्मों यं विगर्हन्ति तमधर्म प्रचक्षते ॥"**

धरति लोकान् उत ध्रियते जनैरिति धर्म इत्युभयथाऽपि खलु सिद्ध्यत्येव । अस्मिन् प्रपञ्चात्मके संसारे ये ये पदार्था अवलोक्यन्ते ते सर्वे परस्परं धारयन्त एव संलक्ष्यन्ते। धारणशक्तिबलादेव ग्रहनक्षत्रतारकादयः पिण्डा स्तिष्ठन्ति । समाजोऽपि धर्मेणैव धार्यते। धर्मश्चेत् समाजं न धारयेत्तदा समाजस्य पतनमवश्यम्भावि

जायेत । अतो धर्म एव निखिलविश्वस्य धारकः ।

**धर्मस्य अर्थः -**

धर्मशास्त्रकाराः स्वस्वमतानुसारं समये समये धर्मस्य नैकविधानर्थान् अकुर्वन् । यद्यपि तानि लक्षणानि भिन्नानि प्रतीयन्ते, परं तेषां लक्षणानां अभिप्राय एक एव लक्ष्यते । महर्षिः कणादः 'अथातो धर्मं व्याख्यास्यामः" इति प्रतिज्ञाय प्रत्यपादयत् – 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।'

अर्थात् येन इहलोकेऽभ्युदयस्य, परलोके च मोक्षस्य प्राप्तिर्भवेत्, स धर्म उच्यते । यस्यानुष्ठानेन मानवः स्वर्गापवर्गाख्यं फलं प्राप्नोति, स एव धर्मशब्देन स्मर्यते। अनेन लक्षणेन वेदविहितकर्मानुष्ठानम्, निषिद्धकर्मप्रतिषेधोऽपि उक्तो भवति।

वैशेषिकदर्शनस्य प्रशस्तपादभाष्ये ईश्वर चोदनेति धर्म उक्तः –

**'तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेः।'**

अस्य भाष्यविवरणे ढुण्डिराजेनोक्तम् –

**'ईश्वरचोदना ईश्वरेच्छाविशेषः।**

गीताभाष्यस्यारम्भे आचार्यः शङ्करः प्रवृत्ति-निवृत्तिलक्षणान्वितं धर्मं द्विविधं मन्यते । तत्राभ्युदयफलकः प्रवृत्तिधर्मः, वेदस्य कर्मकाण्डदेवताकाण्डयोः प्रतिपादितः। निःश्रेयसफलको निवृत्तिधर्मो ज्ञानकाण्डे न प्रतिपादितः । तथोक्तम् –

**"प्रवृत्तिसञ्ज्ञके धर्मे फलमभ्युदयो मतः।**
**निवृत्तिसञ्ज्ञके धर्मे फलं निःश्रेयसं मतम् ।।**

एवमेव मनुः वेदादिविहितमपि कर्म प्रवृत्तिनिवृत्तिभेदेन द्विविधं प्रतिपादयति । उक्तं तेन -

"सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च।

**प्रवृत्तञ्च निवृत्तञ्च द्विविधं कर्म वैदिक म्।।**

अत्र वैदिकं कर्म ज्योतिष्टोमादिप्रतीकोपासनादि आचार्यैः स्वीक्रियते । स्वर्गादिसुखप्राप्त्यर्थं संसारप्रवृत्तिकारणत्वात् प्रवृत्ताख्यं वैदिकं कर्म भवति। मोक्षप्राप्त्यर्थं कृतं कर्म नैःश्रेयसिकं भवति। तत् संसारनिवृत्तिकारणत्वाद् निवृत्तिसञ्ज्ञकं वैदिकं कर्म भवति। एतादृशयोः द्विविधयोः वैदिककर्मणोः स्वरूपमुक्तं मनुना –

**"इहामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।**
**निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ।।**

तत्र यत्कामनया विधीयते, तस्य संसारप्रवृत्तिकारणत्वात् प्रवृत्तमित्यभिधीयते। दृष्टादृष्ट कामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्वकं संसारनिवृत्तिहे तुत्वं निवृत्तमित्युच्यते । मनुः एतयोः कर्मणोः फलमपि भिन्नं भिन्नं प्रत्यपादयत् –

**"प्रवृत्तं कर्म संसेव्यं देवानामेति साम्यताम्।**
**निवृत्तं सेव्यमानस्तु भूतान्येति पञ्च वै।।**

अर्थात् मानवो यदि प्रवृत्तकर्माभ्यासरतस्तर्हि स देवसमानगतिं प्राप्नोति । मानवः निवृत्तकर्माभ्यासरतश्चेद् मोक्षं प्राप्नोति। कर्मण इदं द्वैविध्यं धर्मस्य द्वैविध्यं निरूपयति । वैशेषिकव्याख्यादिष्वपि प्रवृत्ति-निवृत्तिलक्षणान्वितो द्विविधो धर्मः समर्थितः। लक्षणकोशे, सिद्धान्तलक्षणसङ्ग्रहे च धर्मस्य नानाविधलक्षणानि प्रभाकरादीनां मतानुसार प्रतिपादितानि। परं लौगाक्षिभास्करादिभिः अधिकांशाचार्यैः वेदोक्तयागादिकमेव धर्मः स्वीकृतः। पूर्वमीमांसायाः प्रतिपाद्यं धर्मो वर्तते – 'अथातो धर्मजिज्ञासा।" महर्षिजैमिनिः 'चोदनालक्षणोऽर्थो धर्मः' इति धर्मलक्षणं सूत्रयामास। चोदनाशब्देन विधे ग्रहणं भवति । उक्तं भाष्यकारेण-

**'चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः।**

मीमांसादर्शनानुसारम् ऐहलौकिक-पारलौकिकोत्कर्षरूपाभ्युदय-प्रदायिन्यां क्रियायां प्रवर्तकस्य शास्त्राचार्यवचनस्य नाम चोदना वर्तते। चोदनैव धर्म इति।

अभ्युदय-निःश्रेयसयोरुभयोः उपकारकाणि अद्रोह-लोभ-बाह्येन्द्रिय-निग्रह दया-तपस्या-ब्रह्मचर्य-सत्य-करुणा-क्षमा-धृतयश्चेति सनातनधर्मस्य दश दुर्लभमूलानि वर्तन्ते –

**"अद्रोहोऽप्यलोभश्च दमो भूतदया तपः।**
**ब्रह्मचर्यं ततः सत्यमनुक्रोशः क्षमा धृतिः।।**
**सनातनस्य धर्मस्य मूलमेतद् दुरासदम् ।।**

भगवता मनुना सामान्यधर्मस्य लक्षणं कुर्वता रागद्वेषरहितं विद्वद्भिर नुष्ठितं कर्म धर्मत्वेन प्रतिपादितम् –

**"विद्वद्भि सेवितः सद्भिर्नित्यमद्वेषरागिभिः।**
**हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ।।**

गौतमो वेदं धर्ममूलं मन्यते। यद्यपि गौतमो धर्मलक्षणं सुस्पष्टं न परिभाषितवान् तथाऽपि स्वीये धर्मसूत्रे सूत्रितवान् –

**'वेदोऽखिलो धर्ममूलम् । तद्विदां च स्मृतिशीले।'' इति ।**

अत एव गौतमानुयायिन उक्तवन्तः –

'वेदविहितकर्मजन्यो धर्मः, निषिद्धकर्मजन्यस्त्वधर्मः।

वशिष्ठः श्रुतिस्मृत्युक्तानि कर्माणि धर्मं न्यरूपयत् । उक्तं तेन -

'श्रुतिस्मृतिविहितो धर्मः। तदलाभे शिष्टाचारः प्रमाणम् ।'

आचार्यौ बौधायनोऽपि धर्मलक्षणं व्यदधात् –

**'उपदिष्टो धर्मः प्रतिवेदम् ।'**
**'स्मार्तो द्वितीयः।'**
**तृतीयः शिष्टागमः। इति।**

मनुः धर्मस्य पञ्चोपादानानि प्रतिपादितवान् ।

१. अखिलो वेदः,
२. वेदज्ञानां परम्परा (स्मृतिः),
३. वेदज्ञानां व्यवहाराः,
४. सज्जनानामाचारः,
५. आत्मतुष्टिः।

**"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुतिष्टरेव च।।**

हारीतोऽपि 'श्रुतिप्रमाणको धर्मः' इत्युक्त्वा धर्मे वेदमेव प्रमाणङ्गीकरोति। भविष्यपुराणेऽपि वेदमूलको धर्मः श्रेयःसाधनरूपत्वेन प्रकीर्तितः -

"धर्मः श्रेयः समुद्दिष्टः श्रेयोऽभ्युदयलक्षणम्।

**स प्रपञ्चविधः प्रोक्तो वेदमूलः सनातनः।।**

याज्ञवल्क्यानुसारं धर्मस्य पञ्चोपादानानि इमानि सन्ति –

**"श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्।।"**

अर्थात् श्रुतिः, स्मृतिः, सदाचारः, स्वस्य आत्मनः प्रियम्, उचितसङ्कल्पोद्भूता आकाङ्क्षा धर्मस्य मूलभूतान्युपादानानि वर्तन्ते। धर्म परिभाषमाणेन याज्ञवल्क्येन होमः, सदाचारः, इन्द्रियदमनम्, अहिंसा, दानम्, वेदशास्त्राणामध्ययनम्, शास्त्रोक्तानां कर्मणामनुष्ठानम् इत्येतेषु योगद्वारा स्वस्वरूपानुभूतिसम्पादनमेव सर्वोत्तमो धर्म उक्त : -

**"इज्याचारदमाहिंसा दानस्वाध्यायकर्मणाम्।**
**अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ।।**

अनेन विवेचनेन स्पष्टमिदं यत् श्रुतिः, स्मृतिः, परम्परागतः शिष्टाचार:एते धर्मस्य मूलाधारा वर्तन्ते । उत्तरमीमांसायाः प्रवर्तको महर्षिव्यासो महाभारते धर्मविषये आह –

**"प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम्।**
**यः स्यात्प्रभवसंयुक्तः स धर्म इति निश्चयः।।**

अर्थात् प्राणिनामभ्युदयाय कल्याणाय चैव धर्मस्य प्रवचन विहितं वर्तते । अत एतदुद्देश्ययुतः अभ्युदयनिःश्रेयससाधक एव धर्म इति धर्मविदां निश्चयो वर्तते । यथोक्तं पूर्वमेव निःश्रेयसं मोक्ष इति। निवृत्तकर्माभ्यासेन मोक्षः प्राप्यते । निवृत्तलक्षणो मोक्षरूपः परमधर्म एव याज्ञवल्क्यस्याभिप्रेतः। परमपुरुषार्थत्वेन सर्वैरपि मनीषिभिर्मोक्ष एव स्वीकृतो वर्तते । अतो मोक्षरूपस्य धर्मस्यैव प्रामुख्यं, प्रवृत्तधर्मस्य च तस्य साहाय्यसम्पादनत्वात् निवृत्तस्याङ्गत्वमात्र प्रमाणीभवति।
तत्र वर्णधर्म-आश्रमधर्म-वर्णाश्रमधर्म-गुणधर्म-निमित्तधर्म सामान्यधर्मात्मकः षड् विधः प्रवृत्तधर्मो धर्मशास्त्रे प्रसिद्धः। निवृत्तधर्मश्चैक एव।
एतेषां सर्वेषां धर्माणां देहस्य जगतः, आत्मनश्चोपकारकत्वेन धारकताऽपि साधिता भवति । महाभारते महर्षि वेदव्यासः तदेवोदघोषयत् –

**"धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।**
**यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः।।**

'आचारलक्षणो धर्मः' अर्थात् यदाचारेण मनसो हृदयस्य च विकासो जायते, स आचारो धर्मोऽभिधीयते।
धर्मस्य त्रयो भेदा विहिता वर्तन्ते -
१. सामान्यधर्मः,
२. विशेषधर्मः,
३. आपद्धर्मः।
यदनुगुणमाचरन् मानवः समाजश्चाभ्युदयं निःश्रेयसं चाधिगच्छतः, तस्य सामान्यधर्मत्वेनोक्तियुज्यते । यथोक्तं मनुना –

**"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।**
**एवं सामासिकं धर्मं चातुर्वर्ये ऽब्रवीन्मनुः ।।**

अर्थात् अहिंसा, सत्यम्, अचौर्यम्, अन्तर्बाह्यशुचित्वम्, इन्द्रियनिग्रहः - एते पञ्च सर्वेषां कृते सामान्यधर्मा वर्तन्ते। अपि च, धर्मस्य लक्षणानि सामान्यधर्मत्वेन मनुना प्रतिपादितानि वर्तन्ते -
"धृतिः क्षमा दयाऽस्तेयं शौचमिन्द्रयनिग्रहः।
धीविद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।
वर्णाश्रमव्यवस्थानुसारं चतुर्भ्यो वर्णेभ्यो, चतुर्य आश्रमेभ्यश्च विहितधर्मस्य पालनं विशेषधर्मो वर्तते ।
आपद्गतमसौविध्यं समक्षीकृत्य देशकालपात्रविचारानुसारं सद्भावालम्बनेन शास्त्रमर्यादानुरूपो यो धर्मोऽनुपाल्यते स आपद्धर्म इत्युच्यते। आपदि अपाकृतायां मानवः मूलधर्मं पुनरङ्गीकुर्याद् । आपद्धर्मे शिष्टानामाज्ञा नूनं पालनीयेति धर्मशास्त्रेषु प्रतिपादितं वर्तते ।
स धर्मः सामान्येन द्विविधः दृश्यते । वेदप्रतिपादितः श्रौतधर्मः स्मृतिप्रतिपादितः स्मार्तधर्मश्चेति ।
स्मार्तधर्मोऽपि पुनः षोढा भिद्यते । तद्यथा वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति । तत्र वर्णधर्मो ब्राह्मणो नित्यं मद्यं वर्जयेदित्यादि । आश्रमधोऽग्नीन्धनभैक्षचर्यादिः । वर्णाश्रमधर्मः पलशो दण्डो ब्राह्मणस्येत्येवमादिः गुणधर्मः । शास्त्री याभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनादिः निमित्तधर्मः। विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तम् । साधारणधर्मोऽहिंसादिः । न हिंस्यात्सर्वाभूतानि' इत्याचाण्डालं साधारणोधर्मः ।

**वर्णधर्मः -**
चतुर्णां वर्णानां धर्मविशेषः इति । अर्थात् वर्णानां किमाचरणं नाचरणञ्चेति ।

**आश्रमधर्मः -**
चतुर्णामाश्रमाणां धर्मविशेषः इति । "शतायुर्वे पुरुषः' इति श्रुतिप्रमाणानुसारं पुरुषस्य समग्रमायुश्चतुर्द्धा विभज्य चतुर्णामाश्रमाणां व्यवस्था परिकल्प्यते । तत्र प्रथमभागे ब्रह्मचारी भवेत् । द्वितीये भागे गृहस्थः, तृतीये वानप्रस्थः ततश्चान्ते सन्यासी भवेदिति । साक्षात् श्रुतिर्वदति।

**वर्णाश्रमधर्मः -**
चत्वारो वर्णाश्चत्वार आश्रमाश्च सनातनधर्ममलभताः भवन्ति । समाजस्य सुसंगठनाय। सुव्यवस्थिताय च वर्णव्यवस्थायारुत्पत्तिः जाताः। मानवस्य जीवनं गतिशीलसंपादनाय। आश्रमाणां व्यवस्था कृताऽस्ति। भारतीयधर्मशास्त्रपरम्परायां वैयक्तिकसामाजिककल्याणपरककर्मणामपूर्व-समन्वयः परिलक्ष्यते । प्रत्येकवर्णानां सामाजिककर्त्तव्याकर्त्तव्यविषये । वर्णधर्मे चर्चा विद्यते। प्रत्येकाश्रमेषु प्रत्येकवर्णानां कर्त्तव्याकर्त्तव्यवर्णनमेव वर्णाश्रमधर्मे भवति। वर्णानां कर्तव्यनिर्धारिताश्रमव्यवस्था जाबालश्रुतौ कृताऽस्ति । "ब्रह्मचर्यपरिसमाप्य गृही भवेत्। गृही भूत्वा वनी भवेत् । वनी भूत्वा प्रव्रजेत्। इतरथा ब्रह्मचर्यादिव प्रब्रजेत्। गृहाद्वा वनाद्वा इति ।'

**गुणधर्मः -**
गुणधर्म इति पदेन शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापरिपालनरूपो यो । धर्मः स उच्यते । अर्थात् राजधर्म इति वोध्यते। न तु यस्य कस्यचन क्षत्रियस्य इति। गुणाः सन्धिविग्रहादयः षट् मनुना चोक्तम्।
सन्धिश्च विग्रहश्चैव यानमासनमेव च ।।
द्वैधीभावं संश्रयं च षड्गुणान् चिन्तयेत् सदा ।।
निमित्तधर्मः -
निमित्तनाम पापं तदाधिकृत्यं कल्पितो धर्मो निमित्तधर्मः इति उच्यते। अर्थात् प्रायश्चित्तम्।
विहिताकरणप्रतिसिद्धसेवननिमित्तं प्रायश्चित्तम् ।
पापक्षयार्थं नैमित्तिककर्मनामधेयम् नवविधपापं मुख्यतः दृश्यते

यथा- महापातकम्, अनुपातकम्, उपपातकम् अतिपातकम् जातिभ्रंशकरपातकम्, शंकरीकरणम्, अपात्रीकरणम्, मलिनीकरणम. प्रकीर्णकञ्चेति । एतेषु पापषु महापातकातिपातकादिनि गुरुपातकानि मलिनीकरणादिनि लघुपातकानि । गुरुणां पापानां कृते गुरुप्रायश्चित्तानि लघुपापानां कृते लघुप्रायश्चित्तानि कल्पितानि।

**साधारणधर्मः -**

मा हिंस्यात् सर्वभूतानि आचाण्डालब्राह्मणस्य साधारणो धर्म । पुनश्च सर्वेषु वर्णेषु । वर्णान्तरालेषु जातिषु मूर्धावसिक्तादिषु सर्वष्वाश्रमेषु अपि धृति क्षमा दमादयः साधारणधर्मत्वेन कल्प्यन्ते। अतएवाक्तं मनुना-

धृतिक्षमादमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।

धीविद्यासत्यमक्रोधो दशकं धर्मलक्षणम्।।

एवं धर्मविमर्शः धर्मशास्त्रे विशिष्टस्थानमावहति इत्यत्र नास्ति शङ्का। धर्मो हि संसारस्य मूलं इत्यतः सर्वे अपि जीवाः स्वधर्माचरणं कुर्युः इति ।

स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः

इति शम् ।।

**अनुशीलितग्रन्थाः**

- मनुस्मृतिः
- याज्ञवल्क्यस्मृतिः
- मिताक्षरटीका
- प्रसस्तपादभाष्यम्
- महाभारतम् शान्तिपर्वः
- तैत्तिरीयब्राह्मणः
- कल्याणपत्रिका
- शावरभाष्यम्
- गौतमधर्मसूत्रम्

**References**


1. (तै.बा. १०/६३/७
2. महा. शा.प. १०९/११
3. सं.सा.भूमिका, पृ. घ ३
4. वि.स्मृ. कल्याण, धर्मशास्त्रविशेषांक १९९६, पृ. १३१
5. वैशे.सू. १/१/१
6. वैशे.सू. १/१/२
7. प्रश.भा.ग्रन्थप्रयोजनम्, प्रकरणम्
8. कल्याण, धर्मशास्त्रा विशेषांक, १९९६, पृ. १३१
9. कल्याण, धर्मशास्त्रा विशेषांक, १९९६, पृ. १३१
10. म.स्मृ. १२/८८
11. म.स्मृ. १२।८९
12. म.स्मृ. १२/९०
13. मी.सू. १/१/१
14. मी.सू. १/१/२
15. शा.भा. १/१/२
16. म.पु, कल्याण, धर्मशास्त्रविशेषांक १९९६, पृ. १३१
17. म.स्मृ. २/१
18. गौ.ध. १/१
19. त.सं. पृ. ७१
20. व.ध.सू. १/४
21. बौ.ध.सू. १/१/१
22. बौ.ध.सू. १/१/३
23. बौ.ध.सू. १/१/४
24. म.स्मृ. २/६
25. म.मु. उद्धृतम् २/१
26. म.स्मृ. उद्धृतम् २/१
27. या.स्मृ. १/७
28. या.स्मृ. १/८
29. म.भा.शा.प. १०९/१०
30. म.भा. शा.प. १०९/११
31. म.स्मृ. १०/६३
32. म.स्मृ. ६/९२
33. या. स्मृ-3/56-57 (मिता / पृ. 443
34. म.स्मृ. 7/160 श्लोकः
35. या. स्मृ. मिता. पृ-2
36. म.स्मृ. 6/92 श्लोकः